34. एकादशाहश्राद्ध. स०

पत्र - २०

1338

10"X6"

॥ अथ एकादशाहश्राद्धं लिख्यते ॥

का॰ श्रा॰ श्रीगणेशाय नमः ॥ अथ दशघटश्राद्धं लिख्यते ॥ आचमनम् पवित्रधार
॥१॥ णं ॥ अपवित्र इत्यादि ॥ अपसव्यम् ॥ अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्व
विमुक्तिपूर्वक अक्षयस्वर्गलोकगमनप्राप्तिकामः दशघटश्राद्धमहं करि- न ३ फल २
ष्ये ॥ दशघटान्संस्थाप्य अमुकगोत्र अमुकप्रेत प्रेतत्वविमुक्तिपूर्वकाक्ष
यस्वर्गलोकगमनप्राप्तिकामनया प्रथमदिनगतसंबंधी एष सोदकुं-
भः सान्नः साज्यः सक्षवः पूगफलसहितः वरुणदैवतः मया दीयते तवो
पतिष्ठताम् ॥ सुशीतलजलोपेतः सर्वोपस्करसंयुतः । घट एष मया दत्तः
प्रेताय उपतिष्ठतु ॥ एवं क्रमेण दश घटान्दत्वा पूजनं कुर्यात् अमुक च ४
गोत्र अमुकप्रेत प्रेतत्वविमुक्तिपूर्वक अक्षयस्वर्गलोकगमनप्राप्तिका फल २
मनया दशघटश्राद्धे ऊर्णासू [illegible] उसीर चंदन भृंगराजपत्रिका धूप दीप नै
वेद्य तांबूल पूगफलानि मत्दत्तानि तवोपतिष्ठंतां अमुकगोत्रस्य अमुक ॥१॥

फला

प्रेतस्य प्रेतत्वविमुक्तिपूर्वकअक्षयस्वर्गलोकगमनप्राप्तिकामनयादश
घटश्राद्धसांगतासिद्ध्यर्थं दक्षिणामयादीयते नवोपतिस्ठतां सव्यम्॥
इति दशघटश्राद्धम्॥ ततः शय्याकांचनपुरुषदानद्विजदंपतिपूजावृषो नं३
त्सर्गैकादशाहश्राद्धानि कुर्यात्॥ अथ मृतशय्यादानप्रयोगः सोपस्कर
शय्यां संस्थाप्य प्रतिज्ञां कुर्यात् अद्येहेत्यादि अपसव्यम् अमुकगोत्रस्य शय्यादानप्र
अमुकनाम्नः प्रेतस्य प्रेतत्वनिवृत्त्यर्थं उत्तमलोकप्राप्त्यर्थं अप्सरोगणसं योगः ५
सेवितविमानेन स्वर्गपुरगमनार्थं आभूतसंप्लवं स्वर्गवासार्थं मरणादिना
दारभ्य एकादशेहनि सोपस्करणशय्यादानमहं करिष्ये तदंगत्वेन ब्राह्म
णपूजनं चाहं करिष्ये सव्यम् ब्राह्मणस्य पादप्रक्षालनम्॥ पूर्ववत् वस्त्रालंका
रादिभिः संपूज्य अद्येहेत्यादि अपसव्यम् अमुकगोत्रस्यामुकनाम्नः-

एका०२

प्रेतस्य प्रेतत्व विमुक्ति पूर्वक अक्षयस्वर्गलोकगमन प्राप्तिकामनया शय्या
दानार्थं अमुकगोत्रं अमुकशर्माणं एभिः गंधाक्षत पूगफल द्रव्यैस्त्वा
महं वृणे ॥ सव्यम् वृतोऽस्मि वृतेन दीक्षामास्थाय प्रतिद

इति प्रतिवचनम् ३

क्षिणां दक्षिणाया अद्धामा प्नोति अद्धया सत्यमाप्यते इति प्रतिवचनम्

संकल्प ४

तिथ ... पूजने

अद्येहेत्यादि अपसव्यम् अमुकगोत्रस्य अमुकप्रेतस्य ० प्रेत० प्रेतप्रति

प्रेत प्रतिमा सुवर्ण की (१) एक

मायाः प्रेतपूजनमहं करिष्ये अग्न्युत्तरेण पूर्वकं शय्यास्य प्रेतप्रतिमा
यां अमुकगोत्र अमुकनामानं प्रेतमावाहयामि इत्येवं षोडशोपचारैः सं
पूजयेत ॥ ततः शय्याशिरः प्रदेशे घृतपूर्णकुंभं निधाय पार्श्वतः सप्तधा
न्यानि निधाय शय्यायां नारिकेलादि फलं च निधाय ॥ ततः सोपस्कर श
य्यायै नमः इति गंधाद्युपचारैः शय्यां पूजयेत ॥ सव्यम् अद्येहेत्यादि ॥ ॥ ६ ॥

यवगोधूमधान्यानि तिलाः कंगुस्तथैव च श्यामकं चीनकं चैव सप्तधान्यमुदाहृतम् ३
सप्तधान्ये ... ॥

अपसव्यम् अमुक गोत्रस्यामुकनाम्नः प्रेतस्य प्रेतत्वनिवृत्त्यर्थं अमलोकप्राप्त्यर्थं अप्सरोगणासेवितविमानेन स्वर्गपुरगमनार्थं आभूतसंप्लवं स्वर्गवासार्थं मरणादीनां द्वादश्यां एकादशेऽह्नि इमां शय्यां सारदारुमयीं तूलिकोत्तरच्छदप्रच्छन्नां प्रेतप्रतिमायुतां सुगंधोपधानघृतकुंभसप्तधान्यकर्पूरकुंकुमागरुचंदनदीपिकोपानच्छत्रचामरवितानासनभोजनजलभाजनतांबूलपात्रफलयुतां उत्तानांगिरोदेवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे न मम शय्यापर्वेसितविप्रहस्ते जलं प्रक्षिप्य मंत्रं पठेत् ॥ यस्माद् शून्यं शयनं केशवस्य शिवस्य च ॥ शय्या ममाप्यशून्यास्यात्तथा जन्मनि जन्मनि १॥ प्रेतस्य प्रतिमा ह्येषा सर्वोपस्करणैर्युता ॥ सर्वरत्नसमायुक्ता तव विप्र निवेदिता २॥ आत्मा शंभुः शिवा गौरी शक्रः सुरगणैः सह ॥ तस्मा-च्छय्याप्रदानेन आत्मा ह्येष प्रसीदतु ॥३॥ इति मंत्रेण ब्राह्मणहस्ते दद्यात् ॥

ए॰का॰३ ब्राह्मणैस्तु विरत्नवे प्रतिग्रहणामि ॥ ॐ स्वस्तीत्युक्त्वा ॥ देवस्यत्वासवितुः प्रसवे
श्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां इतिमंत्रेण प्रतिगृह्णीयात् ॥ दानान्तेतस्य श
य्यादानस्य संपूर्णतायै इदं हेमसुवर्णं परिमाणां दक्षिणात्वेन अमुक गोत्राय
अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति विप्रहस्ते दद्यात् ॥ प्रतिगृही
स्वस्तीत्युक्त्वा कामस्तुतिं पठेत् ॥ कोदात् कस्माअदात् कामोदात् कामाय दात्
कामोदाता कामः प्रतिग्रहीता कामैतत्ते ॥ स्त्रीणां शयनेआसनमंजनकंकति कां
प॰ तस्मै ब्राह्मणाय दद्यात् ॥ प्रतिग्रहानंतरं ब्राह्मणं करेधृत्वा शय्यायामुपवेशयेत् ॥ मु
हूर्तमात्रं शय्यायां विश्रम्य स्वगृहं गच्छेत् ॥ पूर्णपात्रं वाचयित्वा भूयसीं दत्वा क
र्मेश्वरार्पणं कुर्यात् ॥ शय्यादानप्रभावेन प्रेतो मुच्येत बंधनात् ॥ अपि पाप
समायुक्तः स्वर्गलोके स गच्छति ॥ सव्यम् अथ कांचन पुरुषदानम् ॥ अद्ये नर
हेत्यादि अपसव्यं म अमुकगोत्रस्य॰ प्रेत॰ कांचनपुरुषदानमहं करिष्ये ॥

अमुक प्रेतस्य

सुवर्ण की प्रतिमा एक ॥३॥

ॐ

सव्यम्॥ सच सौवर्णः स्यात्॥ तं व्याहृतिभिरावाह्य॥ भूर्भुवः स्वः कांचनपुरुष इहा
गच्छ इह तिष्ठ॥ अद्येहेत्यादि॥ अपसव्यम् अमुकगोत्रस्य० प्रेत० कांचनपुरुष
पूजनमहं करिष्ये सव्यम्॥ कांचनपुरुषाय नमः इति पाद्याद्युपचारैः संपूज्य॥ अ
द्येहेत्यादि अपसव्यम् अमुकगोत्रस्यामुकप्रेतस्येमं कांचनपुरुषं यथापरि
मितं फलवस्त्रादिसहितं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सं
प्रददे॥ कृतैतत्कांचनपुरुषदानसांगताप्रतिष्ठार्थं मनोभिलषितां दक्षिणां
च तुभ्यमहं संप्रददे॥ सव्यम् अद्येहेत्यादि॥ अपसव्यम् अमुकगोत्रस्या
मुकप्रेतस्य द्विजदंपतिपूजनमहं करिष्ये॥ सव्यम् द्विजदंपतिभ्यां नमः इति
पूजयेत् सर्वोपचारैः॥ तत्परितोषिकवस्त्रालंकारादिदक्षिणां दद्यात्॥ तदभावे
त्वक्षतं पुंयादौ भावाद्य॥ सामग्रीं च द्विजेषु प्रतिपादयेत्॥ अद्येहेत्यादि अपस
व्यम् अमुकगोत्रस्यामुकप्रेतस्य एतां सामग्रीं तुभ्यमहं संप्रददे॥ सव्यम्॥

अमुक प्रेतस्य

प्रेत०४

ब्राह्मणाय

प्रेत०४

द्विज दंपतिके माभाव मे प्रेत मातृके स सोपये दोकुर लिखा है

यावंति रोमाणि वृषभस्य अंगे तावत्कोटिशतसहस्राणि रुद्रलोके महीपते ॥१॥ शृंगेन लिखते भूमिं पुच्छेन दधि तृतं पितॄणां दत्त
पानं तत्सेतु मृतमुपतिष्ठति ॥२॥ क्षीणापि वृषोत्सर्गेण रोगैर्नारी यस्य नोत्सृज्यते वृषः प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि समहिकायाः नोत्तरात् ॥ पतिपुत्रवती नारी भर्तुरग्रे मृता यदि वृषोत्सर्गं न कुर्वीत गां दद्यात् पयस्विनीम् ॥

प्र

स्का. ४ ततो वृषोत्सर्गं कुर्यात् ॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ॥ श्वेतः
खुरविषाणाभ्यां स नीलो वृष उच्यते ॥ तत्र प्रेतमातृपूजा शिष्टाचारात् ॥ मा
तरश्च ॥ काली कराली भद्रा च भीषणा च भयोत्कटा ॥ संहारिणी दुराधर्षा
सप्तैताः प्रेतमातरः ॥ अद्येत्यादि अपसव्यम् ॥ अमुकगोत्रस्य अमुकप्रे
तस्य करिष्यमाण वृषोत्सर्गांगत्वेन प्रेतमातृणां यथामिलितोपचारैः
पूजनमहं करिष्ये ॥ सव्यम् ॥ तासां पूजनमावाहनादि वसोर्धारान्तं प्रण
वादि चतुर्थ्यन्तनामभिर्मंत्रैः ॥ ॐ काल्यै नमः ॥ इत्यादिभिः कुर्यात् ॥ मातृणां
मध्ये वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं वसोः देव
स्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ इति मंत्रे
ण तिस्रः पंच सप्त वा वसोर्धाराः कुर्यात् ॥ अनेनानेन पूजनेन प्रेतमातरः प्रीयन्तां
प२ तु ॥ अथ वृषोत्सर्गार्थं स्थंडिले पंचभूसंस्कारपूर्वकमग्निं संस्थाप्य ॥ प्रति
ज्ञां कुर्यात् ॥ अद्येत्यादि ॥ अपसव्येन ॥ अमुकगोत्रस्य अमुकप्रेतस्य अक्षय प्रेत० १

वृषोत्सर्जनवेलायां वृषाभावः कथंचन मृद्भिः पिष्टैश्च दर्भैर्वा वृषं कृत्वा विमोचयेत् ॥१॥
न सम्भवाते वृषोत्सर्गे होमं वा तत्र कारयेत् ॥

न।

स्वर्गलोकगमप्राप्तिकामः वृषोत्सर्गमहं करिष्ये ॥ स्वथ्यम् ॥ तत ईशान्याम-
८२ श्वस्थले संछन्नं चंदनादिगंधद्रव्यचर्चितमव्रणं कलशं जलपूर्णं स्थापये-
त् ॥ तत्र कलशे गणेशं प्रतिष्ठाप्य अद्येहेत्यादि करिष्यमाणवृषोत्सर्गक-
१०४ र्मनिर्विघ्नपरिसमाप्त्यर्थं गणेशादीनामावाहनादिपूजनमहं करिष्ये एषोऽर्घः
इदं वः पाद्यं इदमाचमनीयं स्नानीयं पूजनं च ॥ गणानांत्वा इत्यनेन गणेशं पूज- न
निढ येत् अम्बितैर्लक्ष्मीं इमं मे वरुण स्त्रघीः हवमायाच क्षतेनानेन पूजनेन
गणेशगौरीवरुणाः प्रीणन्तु ॥ वृषोत्सर्गकर्मणाहं यक्ष्ये तत्राग्निमग्निं प्र-
जापतिमिन्द्रमग्निं सोममाज्येनाग्निं रुद्रं सर्वं पशुपतिमुग्रमशनिं भवं
महादेवमीशानं पायसेन पूष्वाणं पिष्टचरुणा शिवचरुतं चरुणा अग्निं
वायुं सूर्यमग्निं वरुणावग्निं वरुणं सवितारं विष्णुं विश्वान्मरुतः स्वर्गी-
न्वरुणं प्रजापतिं नमस्यं यक्ष्ये ॥ ततो ब्रह्मोपवेशनम् ॥ अत्र संक्षारं प्रणीताप्रण-

माज्ये।

एका॰५ पनं यथा मध्ये सेतुं कृत्वा मूलेययः अग्रे जलमासिच्य पूरयेत् ॥ पात्रासादनं तो
मव२ कृष्णानंतरं सिद्धे पोह्नंचरुमासादयेत् ॥ आज्येन निर्वपनानंतरं चरुस्थाल्यां प्र
णीतं पयो निरुप्य तंडुलान्प्रक्षिप्याज्येन सह युगपच्छ्रपयेत् पर्यग्निकरणा
दि पर्युक्षणांते ॥ आघारात्प्रागाज्याहुतीर्जुहोति ॥ इहरति इत्यादीनां देवाऋ
षयः अग्निर्देवता चत्वारि यजूंषि इहे उक्तिनहावाज्यहोमे विनियोगः ॐ इहरतिः स्वा
हा इदमग्नये ॐ इह रमध्वं स्वाहा इदमग्नये ॐ इहधृतिः स्वाहा इदमग्नये ॐ
इहस्वधृतिः स्वाहा इदमग्नये ॐ उपसृजं धरुणं मात्रे धरुणो मातरं धयत्स्वाहा इ
दमग्नये ॐ रायस्पोषमस्मासु दीधरत्स्वाहा इदमग्नये ॥ ततः आघारहोमं तूष्णीं
६३ ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इंद्राय स्वाहा इदमिन्द्राय विदिक्षु ॐ अ-
ग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय ॥ ततः पायसचरुमभिघा
र्य जुहोति अग्नये स्वाहा इदमग्नये ॐ रुद्राय स्वाहा इदं रुद्राय ॐ सर्वाय स्वाहा ५

इदꣳ सर्वाय ॐ पशुपतये स्वाहा इदꣳ पशुपतये ॐ उग्राय स्वाहा इदमुग्राय ॐ अशे
शनये स्वा॒हा इदमशनये ॐ भवाय स्वाहा इदं भवाय ॐ महादेवाय स्वाहा इदं महादेवा ५२
य ॐ ईशानाय स्वाहा इदमीशानाय॥ ततः पौष्णचरुमभिघार्य स्रुवेण जुहोति॥ पूषा गा
इति गौतम ऋषिः पूषा देवता गायत्री छंदः पूषा पिष्ट चरु होमे विनियोगः ॐ पूषा गा अन्वे
तु नः पूषा रक्षतु सर्वतः पूषा वाजꣳ सनोतु नः स्वाहा इदं पूष्णे॥ ततः पायसपिष्टचरुभ्यामु
त्तरार्द्धाद्दाक्षिण्येन स्विष्टकृतं जुहोति ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते॥
ततः आज्येन भूराद्याः प्रजापत्यंता नवाहुतीर्जुहोति ॐ व्याहृतीनां प्रजापति ऋषिः अग्नीवा
यु सूर्या देवता भूर्भुवः स्वरिति गायत्र्युष्णिगनुष्टुप् छंदांसि आज्यहोमे विनियोगः ॐ
भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदꣳ सूर्याय त्वन्नो अग्न
इति वामदेव ऋषिः अग्नीवरुणौ देवते त्रिष्टुप् छंदः होमे विनियोगः ॐ त्वन्नो अग्ने वरुणस्य
विद्वान् देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि-

कु॰का॰ ६ प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ॥ सत्वन्नोअग्नइतिवामदेवऋषिःअग्नि
वरुणौदेवते त्रिष्टुप्छंदः होमेविनियोगः ॥ सत्वन्नोअग्नेवोमोभवतिनेदिष्टोअस्या
यउ उषसोव्युष्टौ अवयक्ष्वनो वरुणं रराणो वीहिमृडीकं सुहवोनएधि स्वाहा
इदमग्नीवरुणाभ्यां अयाश्चाग्नइतिवामदेवऋषिःअग्नीवरुणौदेवते त्रिष्टु
ॐ प्छंदः होमेविनियोगः अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि
अयानोयज्ञंवहास्यानोधेहिभेषजं स्वाहा इदमग्नये ॥ येतेशतमितिवामदेवऋ ॐ
त षिः वरुणः सविता विष्णुर्विश्वेमरुतः स्वर्का देवता त्रिष्टुप्छंदः होमेविनियोगः ये ॐ
तेशतंवरुणं येसहस्रं यज्ञियाः पाशावितताममहांतस्तेभिर्नो अद्यसवितोतविष्णु
विश्वेमुंचंतुमरुतःस्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो
मरुद्भ्यः स्वर्केभ्यः ॥ उदुत्तममितिशुनःशेपऋषिः वरुणोदेवता त्रिष्टुप्छंदः हो
मेविनियोगः ॥ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथवयं
ॐ १

यव चूर्णका वृषभ व गौ वनावे तेहिका अश्र वाहन करे मंत्र ॐ जं रं लं वं शं खं हं सः
वृषभ पुत्तल प्राणाइह प्राणा जीवइह स्थितः सुखं चिरं तिष्ठंति ॥

बैल के जरे मा १ पैसा १ सुपारी
१ गौं का नेवा घर कर बांध देना
इसी प्रकार गौ
बांधना २

मादित्य व्रुते तवा नाग सोऽअदित यस्याम स्वाहा इदं वरुणा यादितये ॐ प्रजापतये
स्वाहा इदं प्रजापतये संश्रवं प्रास्य ब्रह्मणे पूर्णपात्रं दद्यात् ॥ कृतेन त्वृषोत्स
र्गीभूत हवनकर्मणः सांगता सिद्ध्यर्थं इदं पूर्णपात्रं ब्राह्मणे [illegible] तुभ्य
अ५४ महं संप्रददे ॥ रुद्राध्यायं जपेत् ॥ यथाऽग्ने रुत्तरतः स्थित्वा वृषभ मस्य दक्षिण
कर्णे जपति ॥ रुद्राध्यायस्य परमेष्ठी ऋषिः प्रथमानुवाकस्याद्यायाः कुत्स ऋ
षिः एकरुद्रो देवता प्रथमाया गायत्री तिसृणा मनुष्टुप्तिसृणां पंक्तिः सप्ताना कं ई: ६
मनुष्टुप्छयोजगती छन्दः नमो हिरण्य बाहवे इत्यादीनां बहवो रुद्रा देवता
यजुरं त्यानुवाके द्वितीयायाः कुत्स ऋषिः सप्तानामेक रुद्रोऽन्यासां बहवो रु
द्रा देवताः प्रथमाया उपरिष्टाद्बृहती द्वितीयायाः जगती तृतीयाऽनुष्टुप्छ पार
रु० यौ त्रिष्टुप् दशानामनुष्टुप्तिसृणां यजुर्जपे विनियोगः ॥ ॐ नमस्ते रुद्र
मन्यव इति ॥ रुद्राध्यायं [illegible] समासो ॥ कुंकुमेनांकयित्वा कयेत् नमेन वामः

चक्रं वर्तुलं प्रोक्तं त्रिशूलं दीर्घमेव च
अस्तं तु शूलं भवेच्चक्रं त्रिशूलं दीर्घमेव च ॥

र.का. ॥ ७ ॥

तथ्यश्चक्रं याम्ये शूलं समालिखेत् धातुनाऽऽद्येन तारेण आयसेनाथवाऽंकयेत् स्तत्
च्छूद्रस्य विपरीतमिति रेणुः ॥ ततो घटोदकेन पूर्वस्थापितेन वृषभं च तेस्त
भिर्वत्सरीभिः स्नापयेत् ॥ तत्र मंत्रः शंनोदेवीरिति दध्यंगाथर्वण ऋषिराऽऽ
पोदेवता गायत्रीछंदः वृषभस्नाने विनियोगः ॐ शन्नोदेवीरभिष्टय आपो
भवंतुपीतये शंयोरभिस्रवंतुनः ॥ ततो घंटावस्त्रमालादिभिर्वृषभमलंकृत्य पू
जयेत् वृषभस्य दक्षिणकर्णे जपेत् ॥ वृषोहि भगवान् धर्मश्चतुष्पादः प्रकी
र्तितः वृणोमि तमहं भक्त्या स मां रक्षतु सर्वदा ॥ अत्र वृषभस्यान्यासश्च केचित्
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनम् उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय
मामृतात् इति शिरः नमस्ते रुद्र मन्यव उतो त इषवे नमः बाहुभ्यामुत ते नमः
इति ललाटे ॥ नमः संभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः
शिवाय च शिवतराय च इति मुखे ॥ प्राणाय स्वाहा पानाय स्वाहा व्यानाय स्वाहा अंबे ॥ ७ ॥

सप्रेनं रक्षतु सर्वदा

येमंत्र बैल के कानमें सुनावेय कोहि भग वान् ६

अंबिकें ऽबालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिकां कांपील

वासिनीं इति नासिकायां ॥ नीलग्रीवाः शितिकंठाः दिवꣳरुद्रा उपश्रिताः प२

तेषाꣳसहस्रयोजनेव धन्वानि तन्मसि इति ग्रीवायां ॥ यज्जाग्रतो दूर

मुदैति दैवं तदुसुप्तस्य तथैवैति दूरंगमं ज्योतिषां ज्योतिरेकं तन्मेमनः

शिवसंकल्पमस्तु इति वक्षसि ॥ शिवो नमासि स्वधितिस्ते पिता नमस्ते स्य ५

अस्तु मा महिꣳसीः निवर्तयाम्यायुषे नाद्याय प्रजननाय रायस्पोषाय सुप्र प४

लोहि२ जास्त्वाय सुवीर्याय इति लांगूले ॥ वृषाठिंन वृषणांभरं नायां गर्भꣳसमुद्रि

यम्ग्प्रवन आयाहि वीतये इति पुच्छे ॥ लोमभ्यः स्वाहा त्वचेभ्यः स्वाहा २ लो

हिता हिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा मा

प्रदक्षिणाद्येक नीपिंदेते संततीधारलजेर्द्धाडे ॥४

ए० का०
॥८॥

वा च प्रदक्षि
णा करणा
द्य४

ॐ सोम्यः स्वाहा मांꣳसेभ्य स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा स्थ
भ्यः स्वाहा स्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा रेतसे स्वा
हा वायवे स्वाहा इति सर्वशरीरे ॥ ततोऽग्नेः प्रदक्षिणांभ्रामयित्वे शान्यं दिश ३
समुत्सृजेत् तथा ग्रथेहेत्यादि अपसव्यम् अमुकगोत्रस्यामुकप्रे
तस्य सोपस्कर वत्सतरी चतुष्ट सहितं वृषम महमुत्सृजे सव्यम ॥
एतं युवानमिति याज्ञवल्क्य ऋषिः वत्सतर्यो देवता यजुः छंदः वृषोत्स
र्गे विनियोगः ॐ एतं युवानं पतिं वो ददामि तेन क्रीडंतीश्चरथ प्रिये
ण मा नः सप्तजनुषा मा गायरांस्यो षेराम सम्मिषामदे म तं च वत्सरी म ५२
ध्यगतं वृषभमनुमंत्रयेत् मयोभूरित्यादीनां त्रयाणां देवा ऋषयः वायु ॥८॥

दैवतायपुः छंदः वत्सरइत्यिद्धयोः इड्राग्नी ऋषिरग्निर्दैवताअनुष्टुप्छं
दः रुचन्नइति देवा ऋषयः अग्निर्दैवतात्रिष्टुप्छंदः तत्वायामीति शुनः
शेफऋषिः वरुणोदेवतात्रिष्टुप्छंदः स्वाराड्इत्यादीनांपंचानांऋषयः
अग्निर्दैवताउपुः छंदः वृषमोमंत्रणोविनियोगः समुद्रोसिनमस्वा
नार्द्रदानुः शंभूर्मयोभूरभिमावाहिस्वाहा महतोसिमरुतांगणाः शं
भूर्मयोभूरभिमावाहिस्वाहा १ वस्यूरसिदुवस्वांच्छंभूर्मयोभूरभिमा
वाहिस्वाहा यास्तेऽग्नेसूर्येरुचोदिवमातन्वंतिरश्मिभिः ताभिर्नो
अद्यसर्वाभीरुचेजनायनस्कृधिर्यैरुचन्नोदेविधेहिब्राह्मणेषुरुचंछं
राजस्तनस्कृधिरुचंविश्येषु शूद्रेषुरुचंमयिधेहिरुचारुचम् ४ तत्वा

यावोदेवाः सूर्येरुचोगोष्वश्वेषुपारुचः इन्द्राग्निताभिः सर्वाभिरुचन्नोधत्तबृहस्पते ॥३॥ २ देवा ३

आमित्रवरुणावंदमान स्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बो
ध्युरुशंस मा न आयुः प्रमोषीः स्वर्णो घर्मः स्वाहा स्वर्णार्कः स्वाहा स्व
र्णः शुक्रः स्वाहा स्वर्णो ज्योतिः स्वाहा स्वर्णः सूर्यः स्वाहा ६ मयोभूरभिमा
वाहि स्वाहेत्यादिरभ्यः स्वर्णः सूर्यः स्वाहेत्यंतं वृषभं स्पृशन् जपेत् प्रवंड
श्च तदा समीक्षणो जपेत् ॥ ततो वृषवत्सतरीणां च पुच्छाग्रे कीत्यग्र
सव्यम् प्राचीनावीति ताम्रपात्रे यवतिलोदकेन वक्ष्यमाणमंत्रेण
तर्पयेत् ॥ यथा स्वधायितृभ्यो मातृभ्यो बंधुभ्यश्चापि तृप्तये ॥ मातृ
पक्षाश्च ये केचित् ये केचित्पितृपक्षयाः गुरुस्वशुरबंधूनां ये कुले
षु समुद्भवाः ये प्रेतभावमापन्नाः ये चान्ये श्राद्धवर्जिताः वृषोत्सर्गेण

गौसुवतोमध्यातं ब्राह्मणायेति

तैः स्वधा अग्रे देवेत्यादि अपसव्यं म् अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्व अक्षय स्वर्गलोक फल प्राप्तिकामः कपिलां गौ महं करिष्ये ॥ सव्यं ब्राह्मणपादप्रक्षालनं गंधमाल्यवस्त्रादिभिः यथासंभवमभ्यर्च्य अग्ने देवेत्यादि अमुकगोत्र अमुकशर्मा रां ब्राह्मण मेभिः रौप्य नाक्षत पूगफल द्रव्यवासोभिः कपिलादानार्थं त्वामहं वृणे ॥ ३ वृणो

ते सर्वे लमं तां तृप्तिमुत्तमां ॥ अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्व विमुक्ति कामनया एकादशेऽह्नि इदं गोपुच्छोदकम् या दीयते तवोपतिष्ठताम् ॥ ततस्तोशान्यां दिशि समुत्सृजेत् सव्यम् ततः कपिलां दद्यात् अग्रे देवेत्यादि अपसव्यम् अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्व विमुक्ति पूर्वकं गोशत सम फलावाप्ति अनंतर सवत्सकपिलारोमभित वर्षपर्यंत को मध्ये नृलोकनिवासकामः सप्तजन्मकृत पापनाशपूर्वक स्वर्गप्राप्तिकामो मोक्षकामो वा सव्यम् इमां कपिलां सवत्सां सहितां भृंगाघु पस्कर युतां म् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रदे नमम मेति सव्यम् विप्रहस्ते जलं प्रक्षिपेत् ॥ कृतैतत् कपिलादान सांगता सिद्ध्यर्थं सवत्सां सहिरण्यमग्नि दैवतं अमुकगोत्राय अमुकशर्मणे ब्रा

२४
अक्षय स्वर्गलोक
फल प्राप्ति
कामः । १ । ५

ति प्रतिवचन
म् गंधादिना
गौ संपूज्य ३

स्मरणाय तुभ्यमहं संप्रददे कपिले सर्वभूतानां पूजनीयासि रोहिणी। तीर्थदेवमयी य
स्मादतः शांति प्रयच्छति ॥ ततः अश्व शिविका महिष्यादि दानं कल्पोक्त विधिना
कुर्यात्सति संभवे ॥ अथ एकादशाह श्राद्धम् ॥ तत्र न विश्वेदेवाः ॥ न दिग्रक्षा
दर्भैः ॥ न प्रणवः न दिग्बंधः न कुशत्रयनिधनम् नाग्नौकरणम् न वि
करादानम् न मधुमती नोल्मुकधारणम् न शेषान्नं न ज्ञानम् नावेति जा
पः न वृत्यामीमदंत न कुशजलादिदानम् न मूर्धाभिषेकः न तिलककरणं
न स्वधावचनम् न तृप्तिप्रश्नः नावाहनम् न पितृशब्दः अथ एकत्य शब्दः
आचमनम् पवित्रधारणम् अपसव्यम् आगंतो स्वागतम् पादप्रक्षा
लनम् निमंत्रणं अमुक गोत्रस्य अमुक प्रेतस्यौर्ध्वकर्तव्ये एकादशाह श्रा

हे भवान् मया निमंत्रितः ॥ गतोसि दिव्यलोके त्वं कृतांत विहितात्पथः म
न सा वायुवेगेन कुशेत्वाहं नियोयियेत् निमंत्रितोस्मीति अक्रोधनैरित्यादि
श्रवणम् पादार्घदानम् अमुकगोत्रे प्रेतत्वविमुक्तिपूर्वक अक्षय स्वर्गलो
कफलप्राप्तिकामनया एष पादार्घो मया दीयते तवोपतिष्ठतां म् ॥ सव्यमाच
म्य अपसव्यम् प्रेत ब्राह्मण इदमासनमास्यताम् दीपं प्रज्वाल्य सव्यं म्
आत्मासनम् कर्मपात्रस्थापनम् यथा आसने पात्रम् पात्रे पवित्रकरण
म् पवित्रस्थेति पवित्रकरणम् शन्नोदेवीति जलम् तूष्णीं उसीरादि प्रक्षे
पत्रं २ पः कर्मपात्रं संपन्नं सुसंभेस्तु प्राणायामः पुंडरीकाक्षस्मरणम् अभ्यु
क्षणं कुर्यात अपसव्यम् अथादि गंधः तिलविकरणम् सव्यं प्रचेतत्या

अपसव्यं १ अमुक १ गमन १

ए॰ का॰ ॥११॥

दि॰ अमुकगोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिपूर्वकअक्षयस्वर्गलोकफलप्राप्ति
कामः एकादशाहश्राद्धमहं करिष्ये तत्संगसत्वाकांत द्वितीयदिननिमि
अमुक त्तकश्राद्धं चाहं करिष्ये अमुकगोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिपूर्वकअक्षयस्व
र्गलोकगमनफलप्राप्तिकामनया एकादशाहश्राद्धे इदं कुशासनं मया दीयते
तवोपतिष्ठताम् हस्तार्घदानम् यथा प्रेतद्विजाग्रे दक्षिणाग्रां रेखां जले नो
ल्लिख्य तत्र पात्रं निधाय तस्मिन्नेकैकेनैकं पवित्रमंतर्धाय शन्नो देवीरिति
जलम् तिलोसीत्यादि तूष्णीं क्षिपेत् प्रेतपात्रं संपन्नं सुसंपन्नमस्तु यादि
श्येति पवित्रं द्विजकरे कृत्वा अमुकगोत्र अमुकप्रेत एष पादार्घो मया दी प्रेत॰ ३
यते तवोपतिष्ठताम् उदकस्पर्शनम् तत्पात्रमुत्तानमेव द्विजवामभागे
निधाय तत्र कुशत्रयनिधानम् गंधादिकं दत्वा अमुकगोत्रैः प्रेतैः तानि उशी एकादशाहश्राद्धे ॥११॥

अमुकप्रेत १

संचंदर   च्यैर

एवंचंदनमृंगराजपत्रिकाधूपदीपनैवेद्यतांबूलपूगफलानि मद्दत्तानि तवोप

तिष्ठताम्॥ ततः छत्रादीनि तन्नामगोत्रेभ्यः एवं श्राद्धभोक्त्रे दद्यात् सव्य

म् ॐ छत्राय नमः ॐ ब्राह्मणाय नमः अर्घेहेत्यादि अपसव्यम् अमु

अमुकस्य प्रेत० कगोत्रस्य प्रेतस्य खरतरदिनकरकिर्यौप्रताय शांतिकामः इदं छत्रम् मृता

नां गिरीशदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे

कृतैतत् छत्रदानसांगतासिद्ध्यर्थं द्रव्यं यथामितं अमुकगोत्राय अमुकश परि४

र्मणे ब्राह्मणाय तुभ्यमहं संप्रददे सव्यम् उपानद्भ्यां नमः ॐ ब्राह्मणा

य नमः अर्घेहेत्यादि अपसव्यम् अमुकगोत्रस्य अमुकप्रेतस्य असिप प्रेत०

त्रवनोपकंटकसंततवालुकादुर्गमभूतसंतरणकामः एते उपानहौ अमा एकादशोक्तः

नां गिरौ दैवते अमुक गोत्राय अमुक शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥
कृतैतत उपानह्दानसांगतासिध्यर्थं यथापरिमितं द्रव्यं तुभ्यमहं सं
प्रददे अथ पादुकादानम् अद्येहेत्यादि अप सव्ये अमुक गोत्रस्य अमुक
प्रेतस्य प्रेतत्वअसिपत्रवनोपकंटसंतमवा उ अमुकादुर्गमभूतसंतरणका
मः एकादशेन्हि इमे पादुके ब्राह्मणाय तुभ्यमहं संप्रददे नममेति सव्य
अद्यैत्यादि अमुक गोत्रस्य प्रेतत्वविमुक्ति पूर्वके निरालं वयममार्गे आधा
रार्थं इमां यष्टिं तुभ्यमहं संप्रददे॥ छत्रोपानहइज्ञाराणिमुद्रिकौ श्रीचवकम
रुलत्तुः आसनंमाजनं चैव पदं सप्तविधं स्मृतम् अथ पददानम् सव्यं
अद्येत्यादि अपसव्यं अमुक गोत्रस्य अमुक प्रेतस्य प्रेतत्वविमुक्ति पू-

हे९
अपसव्यं अमुकप्रेतस्य अक्षयस्वर्गलोकवासमनफलप्राप्तिकामः ६
हे१

कृतैतत्पादुकादानसांगतासिध्यर्थं यथापरिमितं द्रव्यं ब्राह्मणाय तुभ्यमहं संप्रददे॥५॥

अक्षयस्वर्गलोकगमनफलप्राप्तिकामः १

र्वकं समस्तपापक्षयपूर्वकरुद्रलोककल्पगणेन्द्रादिसेवितशिवपदप्राप्ति
कामः एकादशेऽह्नि पददानमहं करिष्ये तदङ्ग. त्वेन ब्राह्मणपूजनं चाहं करि
ष्ये सव्यं अर्घेत्यादि अपसव्यं अमुकगोत्रस्य अमुकप्रेतस्य प्रे० वस्त्रोपा
नच्छत्रासनभोजनभाजनजलपूर्णकमण्डलुसुवर्णमुद्रिकां तुभ्यमहं संप्र
ददे न मम सांगतासिध्यर्थं द्रव्यं तुभ्यमहं संप्रददे (पञ्चपात्रदानं सव्यं अ
र्घेत्यादि अपसव्यं अमुकगोत्रस्य प्रेतस्य प्रेत० इमानि पंचपात्राणि धर्मध्व
जप्रीत्यर्थं तुभ्यमहं संप्रददे कृतैतत्पंचपात्रसांगतासिध्यर्थं द्रव्यं तुभ्यम
हं संप्रददे अथान्नदानं सव्यं अर्घेहेत्यादि अपसव्यं अमुकगोत्रस्य अ
मुकप्रेतस्य प्रेत० एकादशाहमारभ्य आसंवत्सरं पारलौकिकसुधानिवृ

एका०१२

त्यपूर्वकाक्षय्यतृप्त्यर्थं प्रत्यहं यथेष्टं तृप्तिक्षमं सोपस्कारं यथाशक्त्यापरि
मितं इदमन्नं विष्णुदैवतं तुभ्यमहं संप्रददे न मम सांगतासिद्ध्यर्थं द्र
व्यं तुभ्यमहं संप्रददे सव्यं आचमनम् अपसव्यं पात्रपरिवेषणं तूष्णीं
पात्रलंभनं इदं विष्णुर्विचक्रमे त्रेधानिदधेपदं समूढमस्य पांसुरे
इतिमंत्रेणावगाहनम् अपहताइतितिलविकरणं अमुकगोत्रस्यामु
कप्रेतस्य प्रेत० इदमन्नं घृताद्युपस्कर सहित मुपनीत मुपनेष्य
माणंच कुशवटब्राह्मण भोजन तृप्तिपर्य्यंतं मद्दत्तं नवोपतिष्ठतां स
व्यं अघेत्यादि अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य प्रेत० पारलौकि
कक्षुत्पिपासानिवृत्तिपूर्वकाक्षय्यतृप्त्यर्थं विविधभक्ष्यभोज्यपेय ॥१३॥

विकरेण विना कुर्यात् प्रेतश्राद्धानि षोडश ॥
विकरेण विनान्यत्र तद्दत्तं नोपतिष्ठति ॥१॥

चोप्यत्ते श्यामकं पंचविधमन्नं ब्राह्मणाय तुभ्यमहं संप्रददे न मम सव्यं
कृतैतत भोजनदान सांगतासिद्ध्यर्थं यथापरिमितां दक्षिणां तुभ्यमहं सं
प्रददे अपसव्यं वेदिकालेपनं अपहता इति रेखाकरणं अवनेजनं अमु
कगोत्र अमुकप्रेत प्रेत० पिंडासनमवनेनिक्ष्व कुशानास्तीर्य पिंडदा
नम् अमुकगोत्र अमुकप्रेत प्रेत० एकादशाह श्राद्धे एष पिंडो मया दी
यते तवोपतिष्ठतां सव्यमाचमनं अपसव्यम् प्रत्यवनेजनम् अ
मुकगोत्र अमुकप्रेत प्रे० पिंडप्रत्यवनेनेक्ष्व मया दीयते तवोपतिष्ठतां सू जनं २
त्रस्थाने तूष्णीं ऊर्णासूत्रं दद्यात् ऊर्ण्यस्थाने तूष्णीं निनयं स्यात् पिं
डार्चा अमुकगोत्र अमुकप्रेत प्रे० एतान्युशीरचंदनभृंगराजपत्रिका

स्या२ स्य२

उष्णीसूत्र धूपदीप नैवेद्य तांबूलपूगफलानि मद्दत्तानि तवोपतिष्ठ
तां अक्षोदकदानं अमुकगोत्र अमुकप्रेत प्रे० एतत्सर्व मद्दत्तं तवो
पतिष्ठतां दक्षिणादानं अमुकगोत्रस्यामुकप्रेतस्य कृतैतदेकाद
शाहश्राद्धसांगतासिध्यर्थं रजतं चन्द्रदैवतं मयादीयते तवोपतिष्ठ
तां अभिरम्यतां अभिरम्यतांस्मि सव्यं आचमनं अनादिनिध
नो देवः शंखचक्रगदाधरः अक्षय्यः पुंडरीकाक्षः प्रेतमोक्षप्रदो भ
व इत्येकादशाहश्राद्धप्रयोगः अथ षड्रसदानम् अपसव्यं अमु
कगोत्रस्य अमुकप्रेतस्य प्रेत० धर्मध्वजप्रीत्यर्थं यथाशक्त्यापरिमि सांगतासिध्यर्थं
तानि इमानि षड्रसानि ब्राह्मणाय तुभ्यमहं संप्रददे न मम घृ द्रव्यं तुभ्यमहं
संप्रददे ॥१॥

॥१४॥

गजस्य दंते तुरगस्य कर्णे गवां च पुच्छे महिषीच शृंगे अजाविकादि स्तन नाभि मध्ये
वृषः खुरे पक्षिगणांशभागे केशेषु दासी हृदयेषु पत्नी हलाग्रकोटी कुरथस्य चक्रे
संकल्पदत्तो जलस्थ भूमौ शेषाणि दानानि च विप्रहस्ते २

तं तैलं च लवणं गुडं कर्पासमेव च कृष्णवर्णा तिलाश्चापि षट् रसाः
परिकीर्तिताः अथ महिषीदानं सव्यमाचमानम् पवित्रधारणं
अद्येहेत्यादि अपसव्यं अमुकगोत्रस्य अमुकप्रेतस्य प्रेत० महि
षीदानमहं करिष्ये तदङ्गत्वेन ब्राह्मणपूजनमहं करिष्ये सव्यं ब्रा
ह्मण पादप्रक्षालन पूर्वकं गंधादिभिः ब्राह्मणं संपूज्य अद्येहेत्या
दि अपसव्यं अमुकगोत्रस्य अमुकप्रेतस्य प्रेत० महिषीदानार्थं
अमुकगोत्रं अमुकशर्माणं ब्राह्मणमेभिः रोचनाक्षतपूगफलद्र
व्यैस्त्वामहं वृणे वृतोस्मीति प्रतिवचनम् सव्यं सर्वोपस्करैः महि
षीं संपूज्य अद्येहेत्यादि अपसव्यं अमुकगोत्रस्य प्रेतस्य प्रेतत्व

एका०॥२५॥ निवृत्यर्थं उत्तमलोकप्राप्त्यर्थं अप्सरोगणसेवित विमानेन स्व
र्गपुरगमनार्थं आभूतसंप्लवं स्वर्गवासार्थं मरणादिनाद्दरम्यस्व
कादशेह्नि इमां महिषीं सुवर्णशृंगतिलकाभरणां घंटाताम्रदो
हनिकां यिरयेकपिष्टक सप्तधान्य पादुकोपेतां यमदैवतां ब्राह्म
णाय तुभ्यमहं संप्रददे नममेति विप्रहस्ते जलं प्रक्षिप्य प्रार्थना इ
न्द्रादि लोकपालानां याराज्यं महिषी शुभा महिषीदान महात्म्यात्सा सु
मेसर्वकामदा १ धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः महिषासुर पा ४
पा ३ स्यजननी यासास्तुवरदामम २ महिषीदानसांगतासिध्यर्थं सुवर्ण
मग्निदैवतं ब्राह्मणाय तुभ्यमहं संप्रददे सव्यं अथाश्वदानमंत्र
प्रयोग इत्यादि अपसव्यं अमुकगोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिपूर्व

॥२५॥

द्वि१
कसकलब्रह्महत्यापापनाशकामः अश्वदानमहं करिष्ये तदङ्गत्वे
नब्राह्मणपूजनमहं करिष्ये सव्यं पादप्रक्षालनपूर्वकं गंधादिभिः
ब्राह्मणं संपूज्य अद्येहेत्यादि अपसव्यं अमुकगोत्रस्य प्रेत० अश्व
दानार्थं एभिरोचनाक्षतपूगफलद्रव्यैस्त्वामहंवृणे सव्यं वृतोस्मी
ति प्रतिवचनं ततः सर्वोपचारैः अश्वमलंकृत्य अश्वपूजामंत्रः मा
र्तंडाय सर्वेगाय काश्यपाय त्रिमूर्त्तये जगद्दीपाय सूर्याय त्रिवेदाय न
मोस्तुते एवं समुच्चरेन्मंत्रं करेण दधाति लोदकं अद्येहेत्यादि अप
सव्यं अमुकगोत्रस्य प्रेतस्य प्रेत० सकलब्रह्मत्यादिपापनाशका ३२
मः अश्वरोमसमसंख्याब्द सूर्यलोकनिवासार्थं इमंअश्वं सुवर्ण

एका०श्रा०१६॥

तिलकालंकारयुतं ललाटं ग्रैवेयक सपर्य्याणान्वितं रौप्यकंठकरत्नो
पशोभितं वज्रनेत्र ताम्रखुरं क्षौमपुच्छं सुवाससं शुभ्र पटक संवृतं
स्वायुधान्वितं धान्यरत्नोपरिस्थितं वल्ह कक्ष सुपद्दकं गन्धपुष्पा
र्चितं ब्राह्मणाय तुभ्य मह संप्रददे न मम अथ प्रार्थना उच्चैःश्रव सर्व्यं ४
स्त्वमश्वानां राज्ञां विजयकारक सर्व्य वाहन नमस्तेस्तु कलौ कर्म मुनीश्व न५
रः १ महार्णवे समुत्पन्नः उच्चैःश्रव सपुत्रक मया त्वं विप्रमुख्याय दत्तो
ह्यसुखी भव २ इमं विप्र नमस्तुभ्य मश्वं ते प्रतिपादितम् प्रतिगृह्णी
य विप्रेन्द्र मया दत्तं सुशोभनं मिति ३ दानमंत्र मुच्चार्य्य करौ समर्पणं कृ
त्वा विप्रहस्ते जलं क्षिपेत् कृतैतदश्वदान सांगता सिध्यर्थं सुवर्णाद। ॥१६॥

क्षिणां तुभ्यमहं संप्रददे ॥ पश्चादश्वपुरागच्छत्यदानां सप्तसप्तिं भास्क
रं मनसि ध्यात्वा ऽऽ लोक्यस्वगृहं व्रजेत् सव्यं एवं क्रमेण रथदानम्
अद्येहेत्यादि अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य प्रेत० अक्षयस्वर्ग
लोकादि सुखावाप्त्यर्थं बलीवर्द्दयुग्मयुतं अष्टादशधान्यपरिवृतं सो
पस्करमेनं रथं विश्वदैवतं तुभ्यमहं संप्रददे न मम सव्यं प्रार्थना रथा
य रथनाथाय नमस्ते विश्वकर्मणे विश्वरूपाय नाथाय अरुणाय नमो
२४ स्तु ते कृतैद्रथदानसांगतासिध्यर्थं सुवर्णदक्षिणां तुभ्यमहं संप्रददे
अथ गजदानम् अद्येहेत्यादि अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य
प्रेत० अक्षय्यस्वर्गलोकादिसुखावाप्त्यर्थं षट्षष्टिसहस्रावधिका
मरपुरभोगोत्तरमहाराजत्वकामः सव्यं इदं हस्तिनं कक्षारज्जुस्थिरा

सन्नद्धितं कौचनमालादिवीरसिंचामरगंधपुष्पालंकृतं प्रजापतिदैवतं तुभ्य
महं संप्रददे न मम इति करं धृत्वा दद्यात् ऐरावतस्त्वं चतुर्दन्तो गजानां ना
यकस्तु यः दिग्दंतिनां पूज्यतमः पापक्षयकरः प्रभुः १ सुप्रतीक गजेन
त्वं सरस्वत्याभिषेकक इन्द्रस्य वाहनः श्रेष्ठः सर्वदेवैश्च पूजितः २
तव दानेन मे शांतिः सर्वदास्तु महत्सुखं कृतैतद्धस्तिदानसांगतासिद्ध्य
र्थं सुवर्णदक्षिणां तुभ्यमहं संप्रददे अथ शिविकादानं अद्येत्यादि
अपसव्यं अमुकगोत्रस्य प्रेतस्य प्रेत० अक्षय्यस्वर्गलोकफलप्राप्ति
कामः देवलोके विपुलभोगानंतरमंते विष्णुसायुज्यवाप्त्यर्थं सव्यं इमां
शिविकां सर्वोपस्करसंयुतां अंगिरोदैवतां तुभ्यमहं संप्रददे न मम कृ
तैतत् शिविकादानसांगतासिद्ध्यर्थं सुवर्णमग्निदैवतं तुभ्यमहं संप्र ॥१७॥

((प्रथम मासिक श्राद्ध))

दद्दे । अथ प्रार्थना शिविकातेमया दत्तां यथाशक्त्या विभूषितां ह्द्विजत्वं प्रति
६२ गृहीष्व वांछितं तेन मे भवेत् ॥ अथ प्रथम माशिक श्राद्धम् ॥ आचमा
नं पवित्र धारणम् अपसव्यं आगतेस्वागतं पादप्रक्षालनम् नि
मंत्रणम अमुक गोत्रस्यामुक प्रेतस्य प्रेत० अद्य कर्तव्ये प्रथम मासि
क श्राद्धे भवान् [illegible] निमंत्रितः निमंत्रितोस्मि गतोसि दिव्यलोके वं
धु [illegible] यथः मनसा वायुवेगेन कुशेनाहं नियोजयेत् आ
कोधनैरितिपठेत् पादार्घदानम् अमुकगोत्र अमुक प्रेत प्रेत० एष पा
द्यो मया दीयते नवोपतिष्ठतां सव्यमाचमनं अपसव्यं प्रेत ब्राह्मण
इदमासन मास्यताम् सव्यं आत्मासनं कर्मपात्र स्थापनम् यथा
आसने पात्रं पात्रे पवित्रेस्थेति पवित्र धारणम् सन्नो देवीरिति जलम्

एका० ॥१८॥

तूष्णीं उशीरादि पुष्पेषु कनिष्ठानेसिंप त्रं सुसंपन्नमस्तु प्राणायामः

पुण्डरीकाक्षस्मरणम् अभ्युक्षणाकुर्यात् तत्रप सव्यम् दिग्बंधः ति

लविकिरणम् सव्यं अपवित्र इत्यादि अपसव्यं अमुकगोत्रस्य अमु

कप्रेतस्य प्रेत० एकादशेन्हि द्वादशाहे सपिंडीकरणायोग्यता सिध्य

र्थं प्रथमेमासे तो दूपकृष्य प्रथममासिकश्राद्धं सकरिष्ये ॥ तत्

त्यकालो दूपकृष्य द्वितीयमासिको दीनि श्राद्धानि विधाहं करिष्ये ॥

ततः कुशासनं अमुकगोत्रस्य अमुकप्रेतस्य प्रेत० प्रथममासि

कश्राद्धे इदं कुशासनं मयादीयते तवोपतिष्ठतां ततः हस्ताघ्येदान

म् यथा प्रेतद्विजाग्रे दक्षिणाग्रं रेखा जलेना सिंच्य तत्रपात्रं नि

धाय तस्मिन् नेकं पवित्रं मंत्रं दीय शन्नोदेवीरिति जलं मूतिलोसी ॥१८॥

यादितस्मिं क्षिपेत् प्रेतपात्रं संपन्नं सुसंपन्नमस्तु यादिव्येति पो
त् पात्रमुत्थाप्य अमुकगोत्र अमुकप्रेत प्रेत० एष हस्तार्घो मया
दीयते तवोपतिष्ठतां गंधादिदानम् अमुकगोत्र अमुकप्रेत प्रेत०
एतान् पुष्पशर चन्दन भृंगराज पवित्रिका धूपदीपनैवेद्य तांबूल पूग
फलानि दत्तानि तवोपतिष्ठंतां ॥ अपसव्यं पात्रपरिवेषणं ततः सव्यमाचमनं
मोपात्रालंभनम् इदं विष्णुर्विचक्रमे इति मंत्रेणाङ्गुष्ठावगाहनं अपहता इति
विकिरणम् अमुकगोत्र अमुकप्रेत प्रेत० इदं विष्णुमन्नं घृताद्यु
पस्कर संहितमुपनीतमुपनेष्यमाणं च ब्राह्मणभोजनं तृप्तिपर्य
न्तं महदन्नं तवोपतिष्ठताम् अथ वेदिकालेपनम् रेखाकरणम् अ
वनेजनम् अमुकगोत्र अमुकप्रेत प्रेत० पिंडासने अवनेजनं मया

एका० ॥१७॥ दीयते तवोपतिष्ठतां कुशान्नास्तीर्य पिंडदानम् अमुकगोत्र अमुक
प्रेत एष पिंडो मया दीयते तवोपतिष्ठतां सव्यमाचमनं अपसव्यं
पितृ प्रत्यवनेजनम् अमुकगोत्र अमुक प्रेत० इदं पितृ प्रत्यवनेज
नं मया दीयते तवोपतिष्ठतां सूत्रस्थाने तूष्णीं उर्णासूत्रं दधात उर्णा
स्थाने दशोर्णानयनं स्यात् पिण्डार्च्चयामि अमुकगोत्र अमुकप्रेत
प्रेत० एतान्युशीरचंदन भृंगराजयष्टिका धूप दीप नैवेद्य तांबूल पूंगी
फलानि महत्तानि तवोपतिष्ठताम् अक्षय्योदकदानम् अमुकगोत्रस्य
प्रेतस्य २ अमुकस्य प्रेत० प्रथममासिकश्राद्धे एतत्सर्वं महत्तं तवोपतिष्ठतां दक्षि
णादानं अमुकगोत्रस्यामुकप्रेतस्य कृतैतत्प्रथममासिकश्राद्धं सां ॥१७॥

गतासिध्यर्थं रजतं चंद्रदैवतं दातुमहमुत्सृजे पितरो मृत्यापयआभिर
म्यतामभिरम्यातोस्मः सव्यमाचमनं इति प्रथममासिकश्राद्धे सर्वत्र
यंक्रमः श्राद्धं प्रति संकल्पविशेषः तद्यथा द्वादशाहे सपिंडीकरणयोग्य
तासिध्यर्थं समुत्स्व्यकालादुपकृष्य एकादशेन्हि द्वितीयमासिकं त्रैप
क्षिके तृतीयमासिक चतुर्थमासिक पंचममासिक षाणमासिक ऊनष
ण्मासिक सप्तममासिक अष्टममासिक नवममासिक दशममासिक
श्राब्दिकश्र एकादशमासिको ऊनाब्दिक आब्दिक श्राद्धानि चाहं करिष्ये इत्येकादशा
हे श्राद्धप्रयोगः समाप्तः शुभमस्तु लिखितं देवीचरणगोगेयेनात्म
पाठार्थे संवत १८७२ मि० माघसु० ३ रवि० ॥ अशातातपः शस्त्रादिना
हतेविप्रे काह्लवद्दाहमाचरेत् पूर्णे पराशरंकृत्वा सपिंडीकरणादिकं मि

ए का०॥२०॥

तिः॥ जलाविना शिरिया तेन न पादं दृष्ट्वा सरीसृपे मरणे दाहनं प्रोक्तं न
दाहं श्राद्धमेव [illegible] नो॥ गंगायां च कुरुक्षेत्रे वाराणस्यां तथा हवे पंच
[illegible] तानां अग्निदाहं न कारयेत्॥ एकादशाह॥ प्रथममासि० द्वितीयमा०
के वैपाक्षिक० द्वितीयमा० तृतीयमा० चतुर्थमा० पंचम० [illegible] षष्ठ० सप्त०
मा० सप्तम० अष्टम० नवम० दशम० एकादश० [illegible] आह्निक श्राद्ध [illegible]
[illegible] सपिंडीकरणं यावत् प्रेतः प्रेत इति स्मृतः सपिण्डीकरणादू
र्ध्वं शर्म्मवर्म्मादि शब्दभाग इति॥